अनुक्रमाङ्क : ..... कूट सं. : 8-20-21S–A

कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 20 प्रश्न हैं और कुल 12 मुद्रित पृष्ठ हैं।

कक्षा–अष्टमी

संस्कृतम्

वार्षिकी परीक्षा

निर्धारितावधिः – होरात्रयम् **पूर्णाङ्काः – 80**

निर्देशा :

1. अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
2. प्रतिखण्डम् उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।
3. प्रत्येकं खण्डम् अधिकृत्य उत्तराणि क्रमेण लेखनीयानि।
4. प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यं लेखनीया।
5. प्रश्नपत्रे उत्तराणि न लेखनीयानि।
6. खण्डसङ्ख्या अपि लेखनीया।

खण्डः–'क' (अपठित–अवबोधनम्) **(10 अङ्काः)**

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत–

श्रावणमासस्य पूर्णिमायां संस्कृतदिवसः भवति। सर्वप्रथमं 1969 तमे वर्षे केन्द्रसर्वकारेण अयं निर्णयः कृतः। सर्वे राज्यसर्वकाराः सूचिताः। अत एव अधुना सर्वेषु राज्येषु संस्कृतदिवससमारोहस्य आयोजनं भवति। सर्वेषु विद्यालयेषु अपि संस्कृतदिवसः आयोज्यते। विद्यालयेषु महाविद्यालयेषु विश्वविद्यालयेषु च अनेकाः संस्कृतप्रतियोगिताः आयोजिताः भवन्ति। इदानीं देशे विदेशे च अन्तर्जालिककार्यक्रमाः यथा गीतं, नाटकं, श्लोकवाचनं, सम्भाषणवर्गः, काव्यपाठः च भवन्ति। प्रायशः सर्वे संस्कृतज्ञाः अध्यापकाः छात्राः च संस्कृतेन एव वार्तालापं कुर्वन्ति। अनेके अतिथयः कार्यक्रमान् द्रष्टुम् आयान्ति। वयमपि तैः सह संस्कृतेन व्यवहारं कुर्मः।

सत्यमेव उच्यते भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(क) वयं केन व्यवहारं कुर्मः ?

(ख) छात्राः संस्कृतेन किं कुर्वन्ति ?

(ग) सर्वेषु विद्यालयेषु किम् आयोज्यते ?

II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 2×2=4

(क) अतिथयः किमर्थम् आयान्ति?

(ग) केन्द्रसर्वकारेण संस्कृतदिवसविषये कदा निर्णयः स्वीकृतः ?

(ग) सत्यं किम् उच्यते?

III. गद्यांशाय समुचितं शीर्षकं लिखत। 1

IV. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नत्रयम्) 1×3=3

(क) 'अध्यापकाः' इति विशेष्यपदस्य विशेषणपदं किम् ?

(i) संस्कृतज्ञाः (ii) संस्कृतस्य (iii) छात्राः

(ख) 'विद्यालयेषु अपि संस्कृतदिवसः आयोज्यते' अस्मिन् वाक्ये क्रियापदं किम् ?

(i) विद्यालयेषु (ii) संस्कृतदिवसः (iii) आयोज्यते

(ग) 'गच्छन्ति' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(i) आयान्ति (ii) यान्ति (iii) भवति

(घ) 'भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिः तथा' अस्मिन् वाक्ये अव्ययपदं किम् ?

(i) भारतस्य (ii) द्वे (iii) तथा

खण्डः-'ख' (रचनात्मक-कार्यम्) (15 अङ्काः)

2. पौष्टिकभोजनस्य महत्त्वं वर्णयन्त्याः मातुः पुत्रं प्रति लिखितं पत्रं मञ्जूषायाः उचितप्रदत्तपदैः पूरयित्वा पूर्णं पत्रं पुनः लिखत ½×10=5

रत्नागिरितः

दिनाङ्कः .....

प्रियपुत्र सन्दीप!

आयुष्मान् भव।

अत्र सर्वं कुशलं, तत्रास्तु। अद्य तव पित्रा लिखतं (i) _____ पठित्वा ज्ञातं यत् भवान् सन्तुलितभोजनं न (ii) _____, प्रतिदिनं च 'चाऊमीन-बर्गर' इति खादति। ईदृशं (iii) _____ स्वास्थ्याय उचितं न भवति। कदाचित् तु एतादृशं सेवनं कर्तुं शक्यते परं (iv) _____ त्वरितभोजनस्य-सेवनं स्वास्थ्याय हानिकरमेव भवति। (v) _____ तु सन्तुलितभोजनम् एव हितकरं भवति। (vi) _____ अपि कथयन्ति यत् 'स्वस्थशरीरे एव (vii) _____ वासः भवति' अतः भवान् त्वरितभोजनस्य सेवनं मा कुरु। (viii) _____ भोजनमेव खादतु। अनेन भवान् कदापि रुग्णः न भविष्यति। भवान् स्वस्य स्वास्थ्यविषये (ix) _____ भवतु इति, मे आज्ञा।

भवतः (x) _____

लक्षिता

मञ्जूषा

पौष्टिकं, पत्रं, माता, जागरूकः, करोति, भोजनं,
वैज्ञानिकाः, प्रतिदिनं, स्वस्थमनसः स्वास्थ्याय

3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्च वाक्यानि लिखत- 1×5=5



मञ्जूषा

छात्राः, शिक्षकाः, पुस्तकालयः, तरण-सरोवरः, अनुशासनम्, क्रीडाक्षेत्रम्, पठन्ति, विद्यालयः, पुस्तकानि, अभ्यासः, दण्डः, पादकन्दुकक्रीडा, पाठयन्ति

अथवा

''अनुशासनम्' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तपदानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत-

मञ्जूषा

जीवने, भवति, महत्त्वम्, जनाः, भवन्ति, सभ्याः, जीवनं, सुखं, प्राप्नुवन्ति, अनुशासनं, परिवर्तयति

4. अधोलिखितानां वाक्यानां संस्कृतभाषया अनुवादं कुरुत- (केवलं पञ्चवाक्यानि) 1×5=5

(क) तुम्हारे पिता कहाँ हैं? Where is your father ?

(ख) वह संस्कृत बोलता है। He speaks Sanskrit.

(ग) हर्षिता विद्यालय जाएगी। Harshita will go to school.

(घ) मैं पाठ पढ़ता था। I used to read the lesson.

(ङ) आज रविवार नहीं है। Today is not Sunday.

(च) मैं गृहकार्य करूँगा। I will do the homework.

खण्डः-'ग' (अनुप्रयुक्त-व्याकरणम्) (25 अङ्काः)

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नत्रयम्)

(क) गच्छति काले ग्रीष्मकालः समाप्तः वर्षर्तुः च आगच्छत्। 1×3=3

(ख) तदा + एव अध्यापकः कक्षां प्रविशति।

(ग) सत्सङ्गगतिः मानोन्नतिं दिशति।

(घ) कस्य + अपि राष्ट्रस्य विकासे मम (नद्याः) महती भूमिका भवति।

6. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितशब्दरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) ..... पिता राजा आसीत्।

(i) रामस्य (ii) रामात् (iii) रामम्

(ख) ..... प्रदेशे अयोध्या अस्ति ?

(i) किम् (ii) कस्य (iii) कस्मिन्

(ग) मम तटेषु ऋषयः ..... च तपस्यां कुर्वन्ति।

(i) मुनिम् (ii) मुनौ (iii) मुनयः

(घ) अस्मिन् वृक्षे मधुराणि ..... सन्ति।

(i) फलम् (ii) फलानि (iii) फलस्य

(ङ) वयं तस्मिन् पर्वते ..... पश्यामः।

(i) साधून् (ii) साधुः (iii) साधवः

7. अधोलिखितवाक्येषु अङ्कानां स्थाने उचितं सङ्ख्यावाचकं संस्कृतपदं प्रयुज्य पूर्णं वाक्यं लिखत - (केवलं प्रश्नत्रयम्) 1×3=3

(क) संस्कृतभाषण-प्रतियोगितायाम् ..... बालिकाः सन्ति। (3)

(i) त्रयः (ii) तिस्रः (iii) त्रीणि

(ख) अहं प्रथमसत्रे संस्कृतविषये ..... अङ्कान् प्राप्तवान् (80)

(i) अशीतिः (ii) एकाशीतिः (iii) नवाशीतिः

(ग) मम विद्यालये ..... अध्यापिकाः सन्ति। (75)

(i) पञ्चाशीतिः (ii) पञ्चसप्ततिः (iii) पञ्चपञ्चाशत्

(घ) उपवने ..... आम्रवृक्षाः आसन्। (28)

(i) अष्टाविंशतिः (ii) अष्टत्रिंशत् (iii) अष्टादश

8. रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च लिखत- (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) विद्यालयं परितः वृक्षारोपणं भवति।

(ख) ज्ञानं विना सुखं नास्ति।

(ग) देवालयस्य पुरतः पाठशाला अस्ति।

(घ) आचार्यः वदति-स्वस्ति युष्मभ्यम्।

(ङ) मम पिता कारचालने निपुणः अस्ति।

9. अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः उचितधातुरूपं चित्वा रिक्तस्थानं पूरयित्वा पूर्णवाक्यं लिखत- (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) अद्य सर्वे छात्राः परीक्षां लेखितुं .....।

(i) गच्छन्ति (ii) गच्छथ (iii) गच्छामः

(ख) वीराः सैनिकाः मातृभूमिं .....।

(i) सेविष्यन्ते (ii) सेविष्ये (iii) सेविष्यसे

(ग) श्वः वयं गीतापाठं .....।

(i) करिष्यावः (ii) करिष्यन्ति (iii) करिष्यामः

(घ) यूयं प्रतिदिनं वार्तापत्रम् .....।

(i) पठेतम् (ii) पठेयम् (iii) पठेत

(ङ) एतौ वृद्धौ दर्शनीयस्थानानि .....।

(i) अपश्यन् (ii) अपश्यताम् (iii) अपश्यत्

10. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा पूर्णवाक्यं लिखत- (केवलं प्रश्नत्रयम्) 1×3=3

(क) अध्यापकः विद्यालयं गत्वा छात्रान् पाठयति।

(ख) सः मूषकाणां समूहं दृष्ट्वा तान् खाद् + तुमुन् इच्छति।

(ग) छात्राः ज्ञानं प्राप्तुं तत्पराः भवेयुः।

(घ) पुत्रः पितरौ प्र + नम् + ल्यप् आशीर्वचनं प्राप्नोति।

11. मञ्जूषातः उचितम् अव्ययपदं चित्वा वाक्येषु रिक्तस्थानानि पूरयत पूर्णं च वाक्यं लिखत- (केवलं प्रश्नचतुष्टयम्) ½×4=2

(क) मम तटेषु ऋषयः ..... तपस्याम् अकुर्वन्।

(ख) महर्षिः दयानन्दः वेदधर्मस्य प्रचाराय भारते ..... अभ्रमत्।

(ग) बुद्धिः ..... मनुष्याणां वास्तविकं बलं भवति।

(घ) वातावरणं ..... रमणीयं भवति?

(ङ) ..... सङ्कणकस्य अधिकः प्रयोगः भवति।

मञ्जूषा - | सर्वत्र, अधुना, अपि, एव, कदा |

12. अधोलिखितेषु वाक्येषु रेखाङ्कितपदेषु उपसर्गं चित्वा संयोज्य वा लिखत- (केवलं प्रश्नचतुष्टयम्)

(क) बालः पितरम् अनुगच्छति। ½×4=2

(ख) अहं 'सिन्धु' नाम्ना वि + ख्याता।

(ग) अध्यापकः कक्षां प्रविशति।

(घ) अहं प्रातः पञ्चवादने उत् + तिष्ठामि।

(ङ) वयं प्रतिदिनं सूक्तिं पठामः।

खण्डः–'घ' (पठित–अवबोधनम्) (30 अङ्काः)

13. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत– 5

पूर्वस्यां दिशि अहं (नदी) महानदी, कोसी, दामोदर, ब्रह्मपुत्र अस्मि। 'ब्रह्मपुत्र' इति मम विशालतमं रूपम् अस्ति। पश्चिमदिशायाम् अहं नर्मदा, वापी, माही, साबरमती, लूनी इति नामभिः वहामि। विश्वे मम विशालतमं रूपम् 'अमेजन–नदी' इति अस्ति। संसारे मम दीर्घतमं रूपं 'नाइल नदी' इति अस्ति।

मम जलं पोषकशक्त्या परिपूर्णम् अस्ति। एतस्मात् कारणात् एव मम तटेषु वृक्षाणां पादपानां वनौषधीनां च दुर्लभाः प्रजातयः उद्भवन्ति। प्राणिजीवनाय स्वच्छं जलं विशुद्धं च पर्यावरणम् आवश्यकम् एव अस्ति। परन्तु अनेके जनाः यन्त्रालयानां विषमिश्रितरसायन–पदार्थान् मम जले क्षिपन्ति मम जलं च प्रदूषितं कुर्वन्ति। एवं न करणीयम्। मम विशुद्धं जलम् एव प्राणिनां जीवनम्। जलं प्रदूषितम् न करणीयम्।

I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) ½×2=1

(क) 'कोसी' कस्यां दिशि वहति?

(ख) 'नाइलनदी' नद्याः कीदृशं रूपम् अस्ति?

(ग) के सुखिनः भवन्तु?

II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2

(क) विश्वे नद्याः विशालतमं रूपं किम् अस्ति?

(ख) जनाः कथं जलं प्रदूषितं कुर्वन्ति?

(ग) पश्चिमदिशायाम् नदी कैः नामभिः वहति?

III. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2

(क) 'वृक्षाणां पादपानां वनौषधीनां च दुर्लभाः प्रजातयः उद्भवन्ति' अस्मिन् वाक्ये 'दुर्लभाः' इति विशेषणपदस्य विशेष्यपदं किम् अस्ति?

(ख) ''मम विशुद्धं जलम् एव प्राणिनां जीवनम्' अस्मिन् वाक्ये अव्ययपदं किम्?

(ग) 'जनाः विषमिश्रितरसायन–पदार्थान् मम जले क्षिपन्ति' अस्मिन् वाक्ये क्रियापदं किम्?

14. अधोलिखितं श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5

जाड्यं धियो हरति सिञ्चति वाचि सत्यं

मानोन्नतिं दिशति पापमपाकरोति।

चेतः प्रसादयति दिक्षु तनोति कीर्तिं

सत्सङ्गतिः कथय किं न करोति पुंसाम्।।

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) ½×2=1

(क) चेतः का प्रसादयति?

(ख) सत्सङ्गतिः किम् अपाकरोति?

(ग) सत्सङ्गतिः कां दिशति?

II. पूर्णवाक्येन उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(क) सत्सङ्गतिः कुत्र कीर्तिं तनोति?

(ख) सत्सङ्गतिः सत्यं कुत्र सिञ्चति?

(ग) सत्सङ्गतिः किं हरति?

III. निर्देशानुसारम् उत्तरत- (केवलं प्रश्नद्वयम्) 1×2=2

(क) ''सत्सङ्गतिः धियः जाड्यं हरति...' अस्मिन् वाक्ये कर्तृपदं किम्?

(ख) श्लोके 'मनः' इति पदस्य समानार्थकं पदं किम्?

(ग) ''सिञ्चति वाचि सत्यं...'' अस्मिन् वाक्ये क्रियापदं किम्?

15. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत- 5

गौरवः - नीतिशतकम् भर्तृहरिणा लिखितम्

नीतिशः - पञ्चतन्त्रम् विष्णुशर्मणा लिखितम्।

बलवीरः - कादम्बरी बाणभट्टेन विरचिता कथा।

सुमेधा - किं विज्ञानसम्बन्धिनः मानवजीवनोपयोगिनः ग्रन्थाः अपि संस्कृते सन्ति?

विवेकः – आम्। आयुर्वेदः, धनुर्वेदः, अर्थशास्त्रम्, कृषिविज्ञानम्, वास्तुशास्त्रम्, दर्शन–शास्त्रम्, व्याकरणशास्त्रम्, वृक्षायुर्वेदः, विमानविज्ञानं च एते विषयाः संस्कृते लिखिताः सन्ति।

प्रणवः – व्याकरणस्य प्रसिद्धः ग्रन्थः कः अस्ति कः च तस्य रचयिता?

प्रज्ञा – 'अष्टाध्यायी' इति व्याकरणस्य प्रसिद्धः ग्रन्थः अस्ति। पाणिनिः च तस्य प्रणेता आसीत्।

प्रज्ञा – महाभारतं व्यासेन विरचितम्।

आचार्यः – साधु, युष्माभिः अतीव मनोरञ्जिका ज्ञानवर्धिनी च इयं प्रश्नोत्तरी आयोजिता। अनया खलु संस्कृतस्य सामान्यः परिचयः प्राप्यते। संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति। अस्माकं संस्कृतेः सभ्यतायाः च मूलम् अस्याम् एव निहितम् अस्ति।

सर्वे छात्राः – वयम् एतां मधुरां भाषां सदैव रक्षिष्यामः।

I. एकपदेन उत्तरत (केवलं प्रश्नद्वयम्) ½×2=1

(क) 'अष्टाध्यायी' इति ग्रन्थस्य रचयिता कः ?

(ख) कः पञ्चतन्त्रम् अरचयत्?

(ग) केन कादम्बरी कथा विरचिता?

II. पूर्णवाक्येन उत्तरत (केवलं प्रश्नद्वयम्) 1×2=2

(क) संस्कृते के विषयाः लिखिताः सन्ति?

(ख) अस्माकं संस्कृतेः सभ्यतायाः च मूलं कुत्र निहितम् अस्ति?

(ग) छात्रैः कीदृशी प्रश्नोत्तरी आयोजिता?

III. निर्देशानुसारम् उत्तरत– (केवलं प्रश्नद्वयम्) 1×2=2

(क) अस्मिन् नाट्यांशे 'रचयिता' इत्यस्य पर्यायपदं किं प्रयुक्तम्?

(ख) 'मधुरां भाषाम्' अनयोः पदयोः विशेष्यपदं किम्?

(ग) 'पाणिनिः च तस्य प्रणेता आसीत्' अस्मिन् वाक्ये क्रियापदं किम्?

16. मञ्जूषायां प्रदत्तैः पदैः रिक्तस्थानानि पूरयित्वा <u>पूर्णं भावार्थं</u> लिखत– ½×4=2

(क) आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।

भावार्थः अस्माकं शत्रुः (1) ..... शरीर एव अस्ति। एषः शत्रुः कः? आलस्यम्। आलस्यम् एव वस्तुतः अस्माकं शत्रुः अस्ति। अतः (2) ..... मा कुरूत।

(ख) शरीरमाद्यं खलु धर्मसाधनम्।

भावार्थः वयं सर्वाणि कार्याणि (3) ..... एव कुर्मः। शरीरम् एव अस्माकं सर्वेषाम् एव कर्तव्यानां प्रमुखं साधनम् अस्ति। (4) ..... पालनस्य साधनम् अस्ति। अतः शरीरेण सदा स्वस्थः भवितव्यः।

मञ्जूषा

शरीरेण, धर्मस्य, आलस्यं, अस्माकं

17. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कृत्वा पूर्णं वाक्यं लिखत। केवलं प्रश्नवाचकं न लेखनीयम्- (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) क्रोधेन कार्यं न सिध्यति।

(ख) काकः शरणार्थं चटकायाः समीपम् अगच्छत्।

(ग) काकः वृक्षे मृत्तिकया सुन्दरं गृहं निर्मितवान्।

(घ) उदारचरितानां तु वसुधैव कुटुम्बकम्।

(ङ) शिष्यस्य भावम् अवगत्य महर्षिः अकथयत्।

18. अधोलिखितं श्लोकं पठित्वा उचितपदैः रिक्तस्थानानि पूरयित्वा पूर्णम् अन्वयं लिखत- ½×4=2

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः।
ते मर्त्यलोके भुवि भारभूताः मनुष्यरूपेण मृगाः चरन्ति।।

अन्वयः येषां न (1) ..... न तपः न दानं न (2) ..... न शीलं न गुणः न धर्मः च (भवति)। ते (जनाः) (3) ..... भुवि भारभूताः मनुष्यरूपेण मृगाः (इव) (4) .....।

19. अधोलिखितानि वाक्यानि कथाक्रमानुसारं संयोज्य पूर्णानि वाक्यानि लिखत। केवलं क्रमसङ्ख्या न लेखनीया- ½×6=3

(क) अहम् अवश्यम् एव अस्य कारणं ज्ञास्यामि।

(ख) इदं दृष्ट्वा शृगालः तं मूषकराजं प्रहरति।

(ग) मम शङ्का शृगालस्य उपरि एव अस्ति।

(घ) मूषकराजः मूषकान् अवदत्-अहम् अपि एवं चिन्तयामि।

(ङ) मूषकराजः तत्र एकाकी एव तिष्ठति।

(च) अग्रिमे दिवसे योजनानुसारं सर्वे मूषकाः दूरं गच्छन्ति।

20. अधोलिखितानां पदानां शुद्धम् अर्थं मञ्जूषातः चित्वा समक्षं लिखत। (केवलं प्रश्नचतुष्टयम्) 1×4=4

(क) धरायाम्

(ख) भक्षयितुम्

(ग) कपाटम्

(घ) वयः

(ङ) रचितवान्

मञ्जूषा

लिखितवान्, भूमौ, आयुः, खादितुम्, द्वारम्

❐❐❐